7

ISSN: 0587-1646

# ANVĪKṢĀ

RESEARCH JOURNAL OF THE DEPARTMENT OF SANSKRIT

[REFEREED JOURNAL]

VOLUME XLIII

GENERAL EDITOR

PROF. KAKALI GHOSH

JADAVPUR UNIVERSITY

KOLKATA 700 032

FEBRUARY 2022

# व्याप्तिपञ्चकस्याद्यलक्षणे माथुरीसंशीतिशीतिविमृष्टिः

रिया-पालः

**सारसंक्षेपः**

चतुर्विधासु न्यायसम्मतप्रमासु अनुमितिर्हि द्वितीया। नव्यमते अनुमितिं प्रति साक्षात् तथा प्राचीनमते परामर्शघटकतया व्याप्तेः कारणत्वमिति नव्या इव प्राञ्चः अपि व्याप्तिस्वरूपनिरूपणपरा आसन्। अतः प्राचीनसम्मतानि पञ्च व्याप्तेर्लक्षणानि तत्त्वचिन्तामणौ पूर्वपक्षत्वेन न्यस्तानि गङ्गेशोपाध्यायेन। तेषु साध्याभाववदवृत्तित्वमिति व्याप्तेराद्यलक्षणं मथुरानाथेन रहस्ये सविशदं व्याख्यातम्। तत्र मथुरानाथेन क्वचित्प्रयुक्ते शब्दे, क्वचिदुदाहरणे, कुत्रचित् नैकेषां पक्षाणाम् अवतरणे प्रथमतया नव्यन्यायाधीतिनां मनस्सु संशीतिरुदेति। तत्संशीतिशीतय एव मे प्रबन्धप्रबन्धनप्रयत्नः।

## उपोद्घातः

भारतीयास्तिकदर्शननिकाये न्यायदर्शनं ह्यन्यतमम्। न्यायदर्शने चत्वारि प्रमाणानि – *प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि* [1] इति। न्यायदर्शननिरुक्तप्रमाणेषु द्वितीयं सुप्रसिद्धं चानुमानम्। अनुमितिप्रमायाः करणं ह्यनुमानम्। ननु किं नाम करणम्? प्राचां मते फलायोगव्यवच्छिन्नं कारणं करणम् इति। यस्माद्धि अव्यवहितोत्तरं कार्यमुत्पद्यते तत्कारणं करणमिति प्राचामाशयः। नव्यमते तु व्यापारवत्कारणं करणम् इति। व्यापारविशिष्टस्य कारणस्य करणत्वम् इति तदर्थः। ननु को नाम व्यापारः इति जिज्ञासायामुच्यते तज्जन्यत्वे सति तज्जन्यजनको व्यापार इति। यथा वृक्षच्छेदनं प्रति कुठारः करणम्। तत्र व्यापार उद्यमननिपतनम्। एवं हि करणविषये मतद्वितयसत्त्वाद् अनुमितिप्रमितेः करणस्यापि द्वैविध्यम्। तथाहि पर्वतो धूमवान् – पक्षधर्मता, ततः यत्र यत्र धूमः तत्र तत्र वह्निः यथा महानसम् – व्याप्तिज्ञानम्, ततश्च वह्निव्याप्यधूमवान् अयं पर्वतः – परामर्शज्ञानम्। ततः अनुमितिप्रमा। अत्र प्राचीनमतानुसारं यतः परामर्शज्ञानात् परमेव अनुमितिप्रमोत्पत्तिः अतः परामर्शज्ञानम् एव करणम्। तथा नवीनानां मते परामर्शरूपव्यापारविशिष्टं व्याप्तिज्ञानम्। अतो व्याप्तिज्ञानम् अनुमितिप्रमायाः करणम्। सामग्रीकारणतावादिनो जरन्नैयायिकस्य जयन्तभट्टस्य मते पक्षधर्मता, व्याप्तिज्ञानं परामर्शज्ञानं च अनुमितिप्रमायाः करणम्। एवं नव्यानां नये अनुमितिप्रमोत्पत्तौ साक्षाद् व्याप्तिज्ञानस्य तथा प्राचां मतानुसारेण साध्यव्याप्यहेतुमत्परामर्शस्य घटकतया व्याप्तिज्ञानस्य आवश्यकता अवश्यं स्वीकार्या। नूनमस्माद्धि व्याप्तिज्ञानघटकीभूताया व्याप्तेः ज्ञानमावश्यकम्। ज्ञाते व्याप्तेः यथार्थस्वरूपे अनुमितिः अपि यथार्था इति यथार्थव्याप्तेः स्वरूपमावश्यकम्। किञ्च, विना पूर्वपक्षपरिष्कारं सिद्धान्तभूतयथार्थस्वरूपज्ञानं व्याप्तेः असम्भवमिति व्याप्तेः पूर्वलक्षणज्ञानम् आवश्यकम्। व्याप्तेः पूर्वलक्षणानि आश्रित्य मथुरानाथेन रहस्यटीका आटीकिता। रहस्ये बहुत्र जिज्ञासामुत्थाप्य तत्समाधित्वेन मतत्रयं मतचतुष्टयं वोपन्यस्तम्। तत्र संशीतिः कथमधिकमतोपस्थापनम् इति। कुत्रचिद्वादिपदप्रयोगः क्वचिद्वा उदाहरणाधिक्योपस्थापनम् इत्यादिसंशीतिततिरुदेति हृदि मे। तासां संशीतीनां दिङ्मात्रमुपस्थाप्य यथामति तत्समाधिप्रदर्शनपराया मे प्रबन्धबन्धेहा।

चिन्तामणिकृतो गङ्गेशोपाध्यायस्य व्याप्तेः स्वरूपनिरूपणाय आदौ पूर्वपक्षमतोपस्थापनम्। ततस्तत्र पूर्वपक्षिणां मतेषु दोषं प्रदर्श्य सिद्धान्तलक्षणं लक्षितं तेन। तथाहि –

> नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः। न तावदव्यभिचरितत्वम्। तद्धि न साध्याभाववदवृत्तित्वम्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्, साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्, सकलसाध्याभावनिष्ठाभाव-प्रतियोगित्वम्, साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात्।[2]

इति।

पूर्वपक्षिणां मतपञ्चकं व्याख्यातवता मथुरानाथेन। तद्व्याख्यातुकामो मथुरानाथ आह - *अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणम् आरभते।* इति। ननु अत्रायं संशीतिर्हि मथुरानाथस्य व्याप्तिस्वरूपनिरुपणमेव इष्टं चेत् टीकायां *व्याप्तिस्वरूपनिरूपणम् आरभते* इत्यस्य स्थाने *व्याप्तिं निरूपयति* इति कथनेनापि इष्टसिद्धिः ध्रुवा। किञ्च, *व्याप्तिं निरूपयति* इति अनुक्त्वा *व्याप्तिस्वरूपनिरूपणम् आरभते* इति कथने मथुरानाथतर्कवागीशस्य ग्रन्थे शब्दनिष्ठगौरवः अपि। अतो *व्याप्तिस्वरूपनिरूपणम् आरभते* इति कथनं गौरवदोषदुष्टम्। तस्मात् मथुरानाथेन *व्याप्तिस्वरूपनिरूपणम् आरभते* इत्यस्य स्थाने *व्याप्तिं निरूपयति* इति कथनमेव उचितम्।

अत्रोच्यते माथुरी गीरेव निर्दुष्टा। तथाहि *व्याप्तिं निरूपयति* इति अनुक्त्वा मथुरानाथेन *व्याप्तिस्वरूपनिरूपणम् आरभते* इति यदुक्तं तदेव युक्तियुक्तम्। व्याप्तिस्वरूपनिरूपणं भवति साक्षात् सिद्धान्तलक्षणेन। तथा च, यथार्थतया सिद्धान्तलक्षणबोधार्थम् आवश्यकं